तत्र भवः। इति तिथितत्त्वं।(यथा मनौ ४।१०५
("एतानाकालिकान् विद्यादनध्यायानृतावपि"।
"तपस्विनः स्थाणुवनौकसस्ता-
माकालिकीं वीक्ष्य मधुप्रवृत्तिम्" ॥
इति कुमारसम्भवे ३। ३४।)

आकालिकप्रलयः, पुं, (आकालिकः प्रलयः।) प्रलय-विशेषः। स्वायम्भुवमन्वन्तरे कपिलशापेन अकाले जगत्प्लावनं। तद्विवरणं यथा—

श्रीमार्कण्डेय उवाच।
"आकालिकोऽयं प्रलयो यतो भगवता कृतः।
तत् शृण्वन्तु महाभागा वाराहं लोकसंक्षयं।
यथा वा मत्स्यरूपेण वेदास्त्राताश्च शार्ङ्गिणा।
तदहं संप्रवक्ष्यामि सर्व्वपापप्रणाशनं" ॥
श्रीकपिल उवाच।
"स्वायम्भुव मनुश्रेष्ठ ब्रह्मरूप महामते।
ममैकमोप्सितार्थं त्वं देहि प्रार्थयतोऽधुना ॥
जगत् सर्व्वं तवैवेदं त्वया च परिपालितं।
त्वया सर्व्वं जगत् सृष्टं त्वमेव जगतां पतिः ॥
तन्मे देहि रहःस्थानं त्रिषु लोकेषु दुर्लभं
पुण्यं पापहरं रम्यं ज्ञानप्रभवमुत्तमं ॥
अहं हि सर्व्वभूतानां भूत्वा प्रत्यक्षदर्शिवान्।
उद्धरिष्ये जगज्जातान् निर्माय ज्ञानदीपिकाम् ॥
अज्ञानसागरे मग्नमधुना सकलं जगत्।
ज्ञानदीपं प्रदायाहं तारयिष्ये जगत्त्रयं" ॥
श्रीमनुरुवाच।
"यदि त्वयाखिलजगद्धितार्थं ज्ञानदीपिकां।
चिकीर्षुणा तपः कार्य्यं किं स्थानार्थनया तव ॥
देवागाराणि तीर्थानि क्षेत्राणि सरितस्तथा।
बहूनि पुण्यभाञ्जत्र तिष्ठन्ति कपिल! क्षितौ ॥
तेषामेकतमं त्वश्चेदासाद्य कुरुषे तपः।
स्थानं ब्रह्मन् तपःसिद्धौ न भविष्यति तत्र किं" ॥
कपिल उवाच।
"त्वयि विश्रम्भमाधाय तपसः सिद्धयेऽचिरात्।
स्थानं मया प्रार्थितं ते त्वं मां क्षिपसि हेतुभिः ॥
अस्माम्यन्ते वचो मेऽद्य प्रार्थनायां विकत्थनं।
यत्त्वं वदसि तस्मात्त्वं फलमेतदवाप्नुहि ॥
इदं त्रिभुवनं सर्व्वं सदेवासुरमानुषं।
हतप्रहतविध्वस्तमचिरेण भविष्यति ॥
न चिरात् द्रक्ष्यसि मनो! जलपूर्णं जगत्त्रयं।
हतप्रहतविध्वस्तं तव गर्व्वविघातनं ॥
एवमुक्त्वा मुनीन्द्रोऽसौ कपिलस्तपसां निधिः।
अन्तर्दधे जगामापि तदा ब्रह्मसदो मुनिः ॥
कपिलस्य वचः श्रुत्वा विषस्नवदनो मनुः।
भावीति प्रतिपद्याशु मनुर्नोवाच किञ्चन ॥
विशालां वदरीं यातो गङ्गाद्वारान्तिकं मनुः।
प्रविश्य तपसे यत्नमकरोल्लोकभावनः।
आराधयामास हरिं जगत्कारणकारणं ॥
ॐ नमो भगवते वासुदेवाय शुद्धज्ञानस्वभाविने।
इति जप्यं प्रजपतो मनोः स्वायम्भुवस्य तु ॥
प्रससाद जगन्नाथः केशवो न चिरादथ।
ततः क्षुद्रझषो भूत्वा दूर्व्वादलसमप्रभः ॥
कर्परकलिकायुग्मतुल्यनेत्रयुगोज्ज्वलः।
तपस्यन्तं महात्मानं मनुं स्वायम्भुवं मुनिं ॥
आससाद तदा क्षुद्रमत्स्यरूपी जनार्दनः।
उवाच च महात्मानं मनुं स्वायम्भुवं तदा ॥
तपोनिधे महाभाग भीतं मां त्रातुमर्हसि।
नित्यं युद्धे जितं मत्स्यैर्विशालैर्भक्षितुं प्रति ॥
अथ प्रभूतैर्विपुलैर्द्रावितः पृथुरोमभिः।
प्राणाकाङ्क्षी महात्मानं भवन्तं शरणं मुनिं ॥
प्राप्तोऽहं यद्यनुक्रोशो मयि मां परिपालय।
इति तस्य वचः श्रुत्वा मनुः स्वायम्भुवस्ततः ॥
अलिञ्जरे तोयपूर्णे न्यधाद्विपुलभोगिनि।
स तस्मिन् मलिके मत्स्यो वर्द्धमानो दिने दिने ॥
सामान्यरोहितप्रायदेहोऽभून्नचिरादथ।
दशघटजलपूर्णं प्रत्यहं स महात्मा
मलिकमसति कुर्व्वन् वर्द्धयामास मत्स्यं।
स च सुविषदनेत्रो मत्स्यराजोऽचिरेण
मलिकसलिलमध्ये लोमशः पीनदेहः" ॥
इति कालिकापुराणे ३१ अध्यायः ॥ * ॥
श्रीमार्कण्डेय उवाच।
"ततस्तया पीनतनुं दृष्ट्वा मत्स्यं मनुः स्वयं।
गृहीत्वा पाणिना फुल्लनलिनीं सरसीं ययौ ॥
तत्सरस्तत्र विपुलं पुण्ये नारायणाश्रमे।
एकयोजनविस्तीर्णं सार्द्धयोजनमायतं ॥
नानामीनगणोपेतं शीतामलजलोत्करं।
तदासाद्य सरो मत्स्यं विनिधाय मनुस्तदा ॥
पालयामास सुतवत् कृपया परया युतः।
सोऽचिरेणैव कालेन पीनो वैसारिणोऽभवत् ॥
न समस्तत्र सरसि वृहत्काये द्विजोत्तमाः।
स एकदा महामत्स्यः पूर्व्वापरतटद्वये ॥
शिरःपुच्छे निधायाशु तुङ्गदेहः समुच्छ्रितः।
स्वायम्भुवं महात्मानं चुक्रोश त्राहि मामिति ॥
तं तथा स मनुर्ज्ञात्वा क्रोशन्तं मीनपुङ्गवं।
आससाद तदा मत्स्यं जग्राह च करेण तं ॥
न शक्नोम्यहमुद्धर्त्तुं पृथुरोमाणमद्भुतं।
इति सञ्चिन्तयन्नेवं प्रोद्धधार करेण तं ॥
भगवानपि विश्वात्मा मत्स्यरूपी जनार्द्दनः।
स्वायम्भुवकरं प्राप्य लघिमानमुपाश्रयत् ॥
ततः कराभ्यामुद्धृत्य स्कन्धे कृत्वाण्डजं मनुः।
निनाय सागरं तत्र तोये च निदधे ततः ॥
यथेच्छमत्र वर्द्धस्व न कोऽपि त्वां हनिष्यति।
अचिरेणैव सम्पूर्णदेहत्वं समवाप्नुहि ॥
इत्युक्त्वा स महाभागः सर्व्वप्राणभृतांवरः।
लघुत्वं चिन्तयंस्तस्य विस्मयं परमं गतः ॥
मत्स्योऽपि न चिरादेव पूर्णकायस्तदा महान्।
सर्व्वतः पूरयामास देहभोगेन सागरं ॥
तं पूर्णकायमालोक्य व्यतीत्याम्भः समुच्छ्रितं।
शृङ्गैः शिराभीरचितं मानसाचलसन्निभं ॥
रुन्धन्तं सागरं सर्व्वं देहाभोगाचलीकृतं।
स्वायम्भुवो मनुर्धीमान् मेने मत्स्यं न तं तदा ॥
ततः पप्रच्छ तं साम्ना मत्स्यं स्वायम्भुवो मनुः।
विचिन्त्य लघिमानञ्च पश्यन्मूर्त्तिं तदाद्भुतां" ॥
श्रीमनुरुवाच।
"न त्वां मत्स्यमहं मन्ये कस्त्वं मे वद सत्तम!।
महत्त्वं लघिमानन्ते चिन्तयन् सुमहत्तम ॥
त्वं ब्रह्मा ह्यथवा विष्णुः शम्भुर्व्वा मीनरूपधृक्।
न चेद्रूपं महाभाग तन्मे वद महामते" ॥
श्रीमत्स्य उवाच।
"आराध्योऽहं त्वया नित्यं यो हरिः स सनातनः।
तवेष्टकामसिद्ध्यर्थं प्रादुर्भूतः समाहितः ॥
यत्त्वमिच्छसि देवेश मत्तः शान्तेन मूर्त्तिना।
तत्करिष्येऽद्य तां मूर्त्तिमिमां विद्धि मनो मम" ॥
श्रीमार्कण्डेय उवाच।
"इति तस्य वचः श्रुत्वा विष्णोरमिततेजसः।
ज्ञात्वा प्रत्यक्षतो विष्णुं मनुस्तुष्टाव केशवं" ॥
श्रीमनुरुवाच।
"नमस्ते जगदव्यक्तपरावरपते हरे।
पावकादित्यशीतांशुनेत्रत्रयधराव्यय ॥
जगत्कारण सर्व्वज्ञ जगद्धाम हरे पर।
सुरौघ परमेशान नारायण सुरेश्वर" ॥
इत्यादिस्तोत्रं।
श्रीमार्कण्डेय उवाच।
"स्वायम्भुवेन मनुना संस्तुतो मत्स्यरूपधृक्।
वासुदेवस्तदा प्राह मेघगम्भीरनिस्वनः" ॥
श्रीभगवानुवाच।
"तुष्टोऽस्मि तपसा तेऽद्य भक्त्या चापि स्तुतो मुहुः ॥
सपर्य्यया तथानेन वरं वरय सुव्रत।
इष्टार्थं संप्रदास्यामि तुभ्यं नात्र विचारणा ॥
वरयाभीप्सितान्कामान् लोकानां वा हितञ्च यत्"
मनुरुवाच।
"यदि देयो वरो मेऽद्य लोकानां यो हितो भवेत्।
तन्मे देहि वरं विष्णो तं वक्ष्यामि शृणुष्व मे ॥
शशाप कपिलः पूर्व्वं मदर्थे भुवनत्रयं।
हतप्रहतविध्वस्तं सकलं ते भविष्यति ॥
येनेयमुद्धृता पृथ्वी येनेयं परिपालिता।
संहरिष्यति यस्त्वेनां तेऽधुना प्लावयन्त्विमां ॥
ततोऽहं दीनहृदयस्त्वामेव शरणं गतः।
न यथेदं त्रिभुवनं जलप्लुतं भविष्यति ॥
हतप्रहतविध्वस्तं तथा त्वं देहि मे वरं"।
श्रीभगवानुवाच।
"न मत्तः कपिलो भिन्नस्तथा न कपिलादहं।
यदुक्तं मुनिना तेन मयोक्तं विहितं मनो ॥
तस्माद्यदुदितं तेन तत् सत्यं नान्यथा भवेत्।
करिष्ये तत्र साहाय्यं स्वायम्भुव निबोध तत् ॥
हतप्रहतविध्वस्ते तोयमग्ने जगत्त्रये।
न चिरादेव तत्तोयं शोषयिष्यामि वै मनो ॥
यावज्जलप्लवस्तावत् यथा कार्य्यं त्वया मनो।
तन्मे निगदितं तथ्यं शृणुष्वावहितोऽधुना ॥
सर्व्वयज्ञियकाष्ठौघैरेका नौका विधीयतां।
तामहं दृढयिष्यामि यथा नो भिद्यते जलैः ॥
दशयोजनविस्तीर्णां त्रिंशद्योजनमायतां।
धारिणीं सर्व्वबीजानां भुवनत्रयवर्द्धिनीं ॥
सर्व्वाश्मिकवल्लीनां भूरिवल्कलतन्तुभिः।
नवयोजनदीर्घान्तु व्यामत्रयसुविस्तृतां ॥
कुरु स्वयं मनो तूर्णं वृहतीमीरिकां वटीं।
जगद्धात्री जगन्माया लोकमाता जगन्मयी ॥